# आधुनिक-चिकित्सा-क्षेत्रे ऊँकारस्य महत्त्वम्

**पूनम गुप्ता**

हिन्दूधर्मशास्त्रानुसारेण सकलैरपि प्राच्यशास्त्रज्ञैः सनातन संस्कतेर्मूलतत्त्वेनैव तथ्यमिदं सुदढ़ं स्वीक्रियते यत् – भूम्युत्पत्तिकाले एव जातः सर्वप्रथमो ध्वनिः ऊँकारः येन नभो भूपाताललोकाः गुंजायमानाः सन्तः स्वत एव स्वसत्तास्वाविर्भूताः।

अस्य पवित्रतमध्वनेः प्रभावस्तु न केवलं भारतवर्षे अपितु समग्रे विश्वे एव स्वीक्रियते प्रमाणीक्रियते च। प्राच्यैः पाश्चात्यैश्च सूरिभिरित्यत्र न किमपि विकत्थनम्। तत्रेदानीं पाश्चात्यदेशेषु प्रमुखतः अमेरीका–ब्रिटेन–आस्ट्रेलियावासिनः चिकित्साशास्त्रिणः ऊँकारस्य विशिष्टप्रयोगेण जनानां न केवलं शारीरिकदोषान् दूरीकुर्वन्ति अपितु मदिरापानादिषु दुर्व्यसनेषु निमज्जमानान् असंस्कत युज्जमान् सुसंस्कतमार्गदर्शनाय पवित्रस्यास्य मन्त्रात्मकस्य ध्वनेः सफलतापूर्वकं व्यवहरन्ति। सद्य एव ब्रिटेनदेशस्यैकस्यां वैज्ञानिकशोधपत्रिकाया प्रकाशित तथ्ये स्पष्टरूपेण ऊँकारस्य वैशिष्ट्यमुल्लेखितम्।

तत्र चिकित्साक्षेत्रे एवंभूताः कतिपया रोगाः सन्ति, येषां निवारणात्मकोपायः। आधुनिक–चिकित्सा–विज्ञाने नैवोपलभ्यते। अतः वैज्ञानिकैः प्राचीनवैज्ञानिकैः प्राचीन शास्त्रपरम्परामादत्य एव तेषां निवारणार्थम् ऊँकारस्य जपः नियमितरूपेण प्रयोगीकतः। तत्र परिणामस्तु आश्चर्यरूपेण समायातः। विशेषतया उदरमस्तिष्कहृदयसम्बन्धिरोगेषु ऊँकारस्य जपः रामबाणौषधिवत् सिद्धयति इति तथ्यं परीक्षितमेव।

रिसर्च एण्ड एक्सपेरिमेंट इंस्टीट्यूट ऑफ न्योरो सांइस इति शोधसंस्थानस्य प्रमुखैः प्रो. जे. मार्गतनैस्तत्सहयोगिभिश्च सप्तभिः वर्षैः हिन्दू–धर्मप्राणतत्त्वस्य ऊँकारस्य महत्त्वपूर्ण प्रभावविषये गभीरमध्ययनं कतम्। अस्यां शोधयोजनायां पंचविंशत्याधिकं शतं पुरुषाः विंशत्यधिकंशत स्त्रियश्य मनोरोगिणः हृदयरोगिणश्च परीक्षिताः। इमे सर्वे रोगिणः केवलं जीवनाधयिकामौषधिं व्यवहृत्वन्तः। कुशलप्रशिक्षकैरिमे प्रतिदिनं प्रातः स्वच्छवातावरणे ऊँकारं जपविधौ नियोजिताः। इत्थं भिन्न–भिन्नवत्तिषुध्वनिषु ऊँकारस्य नियमितजपपूर्वकं वर्षचतुष्ट्यानन्तरं चिकित्सकीयं यत् तथ्यं संगहीतं, तत्तु विस्मयकारकमासीत्। तत्र रोगिषु रोगाणां नवति प्रतिशतं न्यूनता परिलक्षिता।

प्रो. मार्गनेनानुसारेण एकः स्वस्थः मनुष्यः प्रतिदिनं नियमितरूपेण ऊँकारस्य जपं कुर्याच्चेत् तर्हि असौ आमरणं स्वस्थजीवनं यापयेत्।

आरोहावरोहक्रमेण भिन्नवत्तेः ध्वनेः संजातकम्पनेन मतकोशिकाः सक्रियाः सन्तः पुनर्जीविताः भवन्ति। ऊँकारस्य विशिष्टोच्चारणेन आमस्तिष्कनासिका कण्ठ हृदयोदरपर्यन्त तीव्ररूपेण रक्तसंचरणं जायते, परिणामतः नैके रोगाः स्वतः प्रशमन्ति। उपर्युक्तमाधुनिकं वैज्ञानिकमनु–संधानन्तु केवलं भौतिकं शरीरं प्रभावयति परन्तु अस्माकं प्राच्यशास्त्रेषु ऊँकारस्य व्यापकं वैशिष्ट्यं वर्णितम्। मरणादनन्तरमपि आविनाशी ऊँकारो सौ जीवात्मनः सहायको भवति। श्रीमद्भगवद्गीतायामुक्तं भगवता श्रीकष्णेन यत् –

**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**
**यः प्रयाति त्यजन्देहं स याति परमां गतिम्।।**[१]

**तदेतस्मिन्विषये महर्षि पतंजलिप्रणीत योगदर्शने अपि निरूपितं यत् तस्य वाचकः प्रणवः तज्जपस्तदर्शभावनमेव इति।।**[२]

ऊँकारस्तु ईश्वरस्य वाचक एवास्ति। अतः परमेश्वरार्थस्वरूपकर–स्यास्य ऊँकारस्य पौनः पौन्येन स्मरणं करणीयम्, जपश्च करणीयः तदस्योंकारस्य महत्त्वख्यापने महर्षि वेदव्यासस्याभिमतं यत् –

**''मन्त्राणां प्रणवः सेतुः''**

ऊँकारो सौ सकलकार्यसिद्धये सेतु इव व्यवहरति। तत्र बौद्धधर्मस्य मन्त्रेष्वपि ऊँकारस्य महत्त्वख्यापनमुपलभ्यते। तद्यथा –

**ओंमणि पद्मे हुँ इति।।**[३]

तत्रोपनिषत्सु अन्यतमायां प्रश्नोपनिषदि महर्षिः पिप्पलादः कथयति यत् –

**सत्यकामः परं चापरं च ब्रह्म यदोङ्कारः।।**[४]

अन्यत्सर्वं शास्त्रमतिरिच्य केवलमस्यैकस्यैव ऊँकारस्य जपेन, स्मरणेन, चिन्तनेन च नैजमिष्टमिच्छन् विज्ञानसम्पन्नः पुरुषः तदधिगच्छति।

ऊँकारस्य महत्त्व प्रतिपादनविषये भगवता धन्वन्तरिणा यदुक्तं तस्य भावो यं यत्–ऊँकारादयः मन्त्राः आयुर्वर्धकाः आरोग्यप्रदायकाश्च सन्ति। एतावदेव न अपितु पंचभूतात्मकशरीरे विनष्टे सति ते स्वर्ग प्राप्तावपि सहायकाः भवन्ति। सो यमोङ्कारः आत्मावबोधको स्ति। ऊँकारः पंचभूतात्मकं शरीरं शोधयति, ओजस्तेजप्रदायकः चास्ति। यजुर्वेदे अथर्ववेदे च सूक्ष्मशरीरसम्बन्धिरोगाणां, स्थूलशरीरसम्बन्धिरोगाणां च प्रशमनार्थं ये

उपायाः वर्णिताः ते सर्वे ओङ्कारमवलम्व्य एव सन्ति। तदेवं बहुविधं प्राच्य शास्त्रसमीक्षणेन दीर्धदीर्घातुरानुभवेन, आधुनिकचिकित्सा शास्त्रिणां प्रयोगात्मकसमीक्षणेनच तथ्यमिदं स्पष्टतामेति यत् स्वास्थ्यलाभाय न केवलं बाह्योपचारः पर्याप्तः, अपितु पूर्णरूपेण स्वास्थ्यलाभाय मन्त्राणां सहयोगः नितान्तमावश्यक एवं।

ॐ आनन्द : ॐ आरोग्य :।।

*व्याख्याता (संस्कत)*
*आयुक्तालय कॉलेज शिक्षा,*
*राजस्थान जयपुर*

**संदर्भ सूची -**

१. श्रीमद्भगवद्गीता – अध्याय ८ श्लोक – १३
२. योगदर्शन समाधिपाद सूत्र २७–२८
३. त्रिपिटक सूत्र – पष्ठ सं. १०५
४. प्रश्नोपनिषद् – ५:२

–––oo–––